# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

**कक्षा**-शास्त्री-१ (SEM-2) **प्रश्नपत्रम्** - ६ (Old & New) **गुणा:** - ७०

**विषय:** - वास्तुशास्त्रम् **कोड**- **CC- 124** **समय:** - ११ त: २

**दिनाङ्क:** - १६/०४/२०१९ **सन्दर्भग्रन्थ:**-वास्तुरत्नावली, शिल्पशास्त्रम्

---

**॥ प्रथमान्विति: ॥** (Unit-1)

**प्रश्न: १ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: सान्वयं व्याख्यां कुरुत । १०**

१ निधनस्थे सहस्रांशो शत्रुता विपदा सदा । हानि: शीतमयूखे च मङ्गले रविजे भयम् ॥
बुधे मानधनप्राप्ति: सुरेज्ये विजयो महान् । शुक्रे स्वजनतो दद्यात्सुखं पुंसां विशेषत: ॥

२ सिंहो वैरिपराभवं प्रकुरुते तिष्ठन् गिरेर्गह्वरे
दुर्गस्थो नृपति: प्रभूतकटकं शत्रुं जयेत्सङ्गरे ।
कैलाशे नगरं शिवेन रचितं गौर्य्यादिसंरक्षणं
दुर्ग: पश्चिमसागरे च हरिणाऽग्येषां किमत्रोच्यते ॥

३ माघेऽर्थलाभ: प्रथमप्रवेशे पुत्रार्थलाभ: खलु पश्चिमे च ।
चैत्रेऽर्थहानिर्धनधान्यलाभो वैशाखमासे पशुपुत्रलाभ: ॥
ज्येष्ठे च मासेषु परेषु नूनं हानिप्रद: शत्रुभयप्रदश्च ।
शुक्ले च पक्षे सुतरां विवृद्धये कृष्णे च यावद्दशमो च तावत् ॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि सविस्तरं लिखन्तु । १०**

१ लग्नशुद्धिपूर्वकं प्रवेशकलशचक्रम् ।

२ जलाशयारामसुरप्रतिष्ठाविधि: ।

**॥ द्वितीयान्विति: ॥** (Unit-2)

**प्रश्न: ३ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: सान्वयं व्याख्यां कुरुत । १०**

१ गृहादिकरणे यत्र नार्चिता वास्तुदेवता ।
तत्र शून्यं भवेत्सर्वं रक्षोविघ्नादिभिर्हरेत् ॥

२ हिमकुन्दप्रतीकाश नागानन्तमहाफणिन् ।
स्थानं देहि गृहं कर्तुं गृहाणार्घं नमोऽस्तु ते ॥

३ अष्टोत्तरशतं हुत्वा घृताक्तं समिधां तत: ।
माषैर्मुद्गैस्तिलैश्चैव तण्डुलैश्च सितैस्तथा ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि सविस्तरं वर्णनं करोतु । १०**

१ गृहप्रवेशविधि: ।

२ गृध्रादिपतने विचार: ।

**॥ तृतीयान्विति: ॥** (Unit-3)

**प्रश्न: ५ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयो: सान्वयं व्याख्यां कुरुत । १०**

१ शत्रुक्षयं वाद्यघोषे देवघोषे भवेच्छुभम् । ज्योति:शास्त्रकथायां तु वर्द्धते गृहिणीधनम् ।

२ प्रागादिदिक्षु द्विपदा: पञ्च पञ्च यथाक्रमात् । ब्रह्मण: पूर्वतो दिक्षु द्विपदा: स्यु: समीपगा: ॥

३ कुयोगे पापलग्ने वा चरलग्ने चरांशके । शुभकर्मणि ये वर्ज्यास्ते वर्ज्याऽस्मिन् प्रवेशने ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखन्तु । १०**

१ वास्तुपूजामुहूर्तमाह ।

२ वास्तुभूमिपरीक्षणे षोडशभूमिलक्षणम् ।

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ वास्तुरत्नावलीग्रन्थस्य रचयिता कः?

२ चतुर्थाष्टमद्वादशस्थिते ग्रामराशेः किं फलम्?

३ ग्रामवासे नराकृतिचक्रे मस्तके कति नक्षत्राणि?

४ पूर्वे कस्य राशेः द्वारम् उत्तमम्?

५ महीं पूर्वे प्लावितः तत् किं फलम्?

६ दैत्यभूमेः निवासे किं फलम्?

७ शल्यशुद्धभूमिखननस्य प्रमाणं किम्?

८ वृक्षाः दुग्धसकष्टकाः गृहे शुभम् अशुभं वा ?

९ भवने कतिपदवास्तुपूजनं योग्यम्?

१० 'माधवे अर्थप्रदाम्' अर्थात् किम्?

११ शिल्पशास्त्रस्य लेखकः कः?

१२ हेरम्बः कस्य नाम अस्ति?

१३ दशम्यां गृहनिर्माणे चौरभयं भवति न वा?

१४ एकादश्यां गृहनिर्माणे राजभयं भवति न वा?

१५ रिक्तातिथिगृहनिर्माणफलं किम्?

०००